Vāk-Madhyamā, a Biannual Peer-Reviewed e-Journal of Research
ISSN 3139-9622

Issue : 001 Vol. 1 theaikyafoundation.org.in February, 2026

अङ्गताबोधकप्रमाणानां बलाबलविचारस्य प्रसक्तिः

महेश चिदम्बर भट्टः
सहायकाचार्यः
कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः, असमः
soolgarcmaheshbhat@gmail.com , Mob:- 8762917602

लेखसारः –

मीमांसाशास्त्रे अङ्गताबोधकप्रमाणानि षट् वर्तन्ते श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्याख्यानि। तेषां विरोधः यदा भवति तदा किं प्रमाणं प्रवर्तते, किं न प्रवर्तते इति विचारः एव बलाबलविचारः। बलाबलविचारः कदा कर्तुं शक्यते? तत्र उदाहरणानि इत्यादिविचारः भगवता जैमिनिना पूर्वमीमांसाशास्त्रस्य तृतीयाध्याये तृतीयपादे षष्ठाधिकरणे न्यरूपयि।

न्यायशास्त्रमिति अपरनामके पूर्वमीमांसाशास्त्रे बलाबलाधिकरणन्यायः एकः मुख्यतमः न्यायः भवति। अस्य उपयोगः प्रायः सर्वशास्त्रेषु एवं लौकिकप्रसङ्गेषु न्यायालयादिषु अपि क्रियते। अतः अस्मिन् लेखे अस्य बलाबलविचारस्य प्रसक्तेः एवं बलाबलनिरूपणार्थम् अपेक्षिताः आरम्भिकाः विचाराः किञ्चित् प्रतुष्टूष्यते।

कूटशब्दाः – अङ्गताबोधकप्रमाणम्,श्रुतिः,बलाबलविचारः, मीमांसाशास्त्रम्, विरोधः.

Vāk-Madhyamā, a Biannual Peer-Reviewed e-Journal of Research
ISSN 3139-9622

Issue : 001 Vol. 1 theaikyafoundation.org.in February, 2026

भूमिका

भगवान् जैमिनिः धर्माधर्मविवेकाय प्रवृत्तं पूर्वमीमांसाशास्त्रं सूत्ररूपेण निबबन्ध। अस्य द्वादशाध्यायात्मकत्वात् द्वादशलक्षणी इति अपरं नाम। तत्र तृतीये अध्याये यदुद्देशेप्रवृत्तकृतिकारकत्वेन विहितत्वरूपमङ्गत्वं[1] न्यरूप्यत।

तत्र अङ्गताबोधकानि श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्याख्यानि षट् प्रमाणानि सन्ति। अङ्गत्वघटकीभूतोद्देश्यत्वकृतिकारकत्वयोः अन्यतरस्य प्राधान्येन वाचकशब्दरूपं श्रुत्याख्यं प्रमाणम्[2], अङ्गत्वघटकीभूतोद्देश्यत्वकृतिकारकत्ववाचकपदकल्पनानुकूलक्लृप्त-पदपदार्थनिष्ठयोग्यतारूपं लिङ्गाख्यं प्रमाणम्[3], अङ्गत्वघटकीभूतोद्देश्यत्वकृतिकारकत्वान्यतरपदार्थ
-कल्पनानुकूलश्रुतपदसन्निधिरूपं वाक्याख्यं प्रमाणम्[4], सन्निहितस्य फलवतः अनवगताङ्गताकपदार्थविषये इतिकर्तव्यतात्वेन अपक्षणत्वरूपं प्रकरणाख्यं प्रमाणम्[5], इतिकर्तव्यतात्वेन अयोग्यसम्बन्धयोः वाक्यार्थयोः सन्निधिः इति लक्षणोपेतं स्थानाख्यं प्रमाणम्[6], प्रकृतविधौ वाक्यार्थानन्वय्यर्थकं क्लृप्तावयवशक्तिकपदरूपं समाख्याख्यं प्रमाणं[7] च क्रमेण न्यरूप्यन्त। तत्पश्चात् एतेषां प्रमाणानां विरोधे बलाबलविचारः कृतः वर्तते।

बलाबलविचारस्य प्रसक्तिः –

[1] भा. दी ३.१.२
[2] भा. दी ३.१.४
[3] भा. दी ३.२.१
[4] भा. दी ३.३.१
[5] भा. दी ३.३.४
[6] भा. दी ३.३.५
[7] भा. दी ३.३.६

अङ्गताबोधकप्रमाणानां विरोधे सति बलाबलविचारः अपेक्ष्यते। १.एकस्य शेषस्य शेषिद्वये प्रमाणद्वयसत्वे, २.एकस्मिन् शेषिणि शेषद्वयविनियोजकप्रमाणद्वयसत्वे च इति प्रकारद्वयेन विरोधः भवति। तत्र एकस्य शेषस्य शेषिद्वये प्रमाणद्वयसत्वविरोधः यथा शेषस्य ऐन्द्री मन्त्रस्य **ऐन्द्र्या गार्हपत्यमुपतिष्ठते** इति श्रुत्या गार्हपत्योपस्थानरूपशेषिणं प्रति अङ्गत्वं बोध्यते, एवं तस्यैव शेषस्य अर्थप्रकाशनसामर्थ्यरूपलिङ्गेन इन्द्रोपस्थानरूपशेषिणां प्रति अङ्गत्वं ज्ञायते। मन्त्रस्य एकत्र प्रयोगे तस्य साध्याकाङ्क्षा शान्ता भवति अतः विनियुक्तस्य पुनः विनियोगः न भवति। अतः क्वचिदेकत्रैव विनियोगः। तस्मात् शेषस्य ऐन्द्रीमन्त्रस्य केन प्रमाणेन किं प्रत्यङ्गत्वमिति जिज्ञासापरिहाराय बलाबलविचारः आवश्यकः।

एकस्मिन् शेषिणि शेषद्वयविनियोजकप्रमाणद्वयसत्वे विरोधो भवति। यथा गार्हपत्योपस्थानरूपशेषिणं प्रति **ऐन्द्र्या गार्हपत्यमुपतिष्ठते** इति श्रुत्या ऐन्द्रीमन्त्रस्य शेषत्वेन प्राप्तिः, अर्थप्रकाशनसामर्थ्यरूपलिङ्गेन आग्नेयमन्त्रस्य शेषत्वेन प्राप्तिः, इत्येवं गार्हपत्योपस्थानरूपशेषिणं प्रति द्वयोः ऐन्द्रीमन्त्रः, आग्नेयमन्त्रः इति अनयोः प्राप्तिः। एकस्मिन् गार्हपत्योपस्थानरूपशेषिणि द्वयोः मन्त्रयोः विनियोगासम्भवः। यतः एकस्य मन्त्रस्य विनियोगेनैव शेषिणः मन्त्राकाङ्क्षा शान्ता भवति इत्यतः अपरस्य मन्त्रस्य आकाङ्क्षा न भवति। अतः द्वयोः एकत्र विनियोगासम्भवात् अत्र विरोधे सति कस्य एकस्य विनियोगः, कस्य न इति निर्णेतुं बलाबलविचारः आवश्यकः भवति।

एकस्मिन् शेषिणि शेषद्वयविनियोगः कदाचित् अविरुद्धतया अपि भवति। यथा **संस्थाप्य पोर्णमासीं वैमृधमनुनिर्वपति**[8] इत्यत्र वाक्यप्रमाणेन वैमृधेष्टेः पौर्णमासीयागाङ्गत्वं ज्ञायते। एवं प्रयाजादीनामपि पौर्णमास्यङ्गत्वं ज्ञायते प्रकरणप्रमाणेन। एवमत्र एकस्मिन् शेषिणि पोर्णमासीयागे शेषद्वस्य वैमृधेष्टेः, प्रयाजादीनाञ्च विनियोगः विरोधं विना भवति, द्वारभेदसत्वात्। यमपूर्वं द्वारीकृत्य वैमृधेष्टिः पौर्णमासीयागाङ्गम्, तमेवापूर्वं द्वारीकृत्य प्रयाजादीनां पौर्णमासीयागाङ्गत्वमित्यत्र प्रमाणं नास्ति। अतः द्वारैक्ये सति यत्र शेषद्वयस्य एकस्मिन् शेषिणि विनियोगः, तत्रैव विरोधः भवति। विरोधे सत्येव बलाबलचिन्ता भवति। प्रकृते ऐन्द्रीमन्त्रः, आग्नेयमन्त्रः इतीमौ गार्हपत्योपस्थानजन्यापूर्वं द्वारीकृत्यैव विनियुज्येते इत्यतः तत्र भवति विरोधः। अतः एव तत्र बलाबलचिन्ता युज्यते।

[8] मीमांसाधिकरणम् ४.३.१४

क्वचित् एकस्य शेषस्य एकस्मिन् शेषिणि विनियोजकप्रमाणानि भवन्ति। तत्र यदि भिन्नानि प्रमाणानि भवन्ति, तर्हि प्रबलं प्रमाणं विनियोजकम्। तत्र दुर्बलप्रमाणेन विनियोगे सम्भवति प्रबलप्रमाणेन विनियोगः प्रयोजनार्थम्। नाम यत्प्रयोजनं प्रबलप्रमाणेन भवति, तत् दुर्बलप्रमाणेन न भवति इति कल्प्यते।

यदि क्वचित् एकस्य शेषस्य एकस्मिन् शेषिणि विनियोजकप्रमाणानि समानानि भवन्ति, तर्हि तत्र एकमेव प्रमाणं विनियोजकम्। अपरं प्रमाणं अनुवादकमिति स्वीकर्तव्यम्। अनुवादस्य किमपि प्रयोजनं नास्ति तर्हि प्रमाणद्वयं ज्ञात्वा अनुष्ठाने क्रियमाणे फलाधिक्यमित्येवम् अभ्युदयशिरस्कत्वं कल्पनीयम्। अथवा अनन्यपरविधिपुनश्रवणरूपाभ्याससत्वात् कर्मान्तरमिति वा स्वीकर्तव्यम्।

अरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणाति[9] इत्यत्र आरुण्यस्य अपूर्वसाधनीभूतक्रयाङ्गत्वं तृतीयया श्रुत्या ज्ञायते इति वदामः। परन्तु न केवला श्रुतिः अङ्गत्वबोधने पर्याप्ता न भवति अपितु वाक्यं प्रकरणमिति प्रमाणद्वयमपि अपेक्षते। परन्तु वाक्यं क्रयं साध्यत्वेन उपस्थापयति, न तु आरुण्यं विनियोजयति। एवं वाक्यप्रमाणम् उद्देश्यत्वसमर्पकम्, न तु वि नियोजकमित्यतः एव **ऐन्द्र्या गार्हपत्यमुपतिष्ठते**[10] इत्यत्र श्रुतिलिङ्गयोर्विरोधः प्रदर्शितः, नतु वाक्यलिङ्गयोर्विरोधः। अत्र समभिव्याहारसत्वात् वाक्यप्रमाणं गार्हपत्योपस्थानं प्रति ऐद्रीमन्त्रस्य अङ्गत्वं बोधयतीति वक्तुं शक्येत परन्तु अत्र वाक्यं केवलम् उद्देश्यसमर्पकम्, न विनियोजकमित्यतः वाक्यलिङ्गयोर्विरोधे इदमुदाहरणं न भवति। एवं प्रकरणमपि, येन केनापि द्रव्येण क्रयसम्भवे अनेनैव द्रव्येण क्रयः कर्तव्यः तदा एव क्रयजन्यमपूर्वं सिध्यति इति अपूर्वसाधनत्वलक्षणातात्पर्यग्राहकं भवति, न तु विनियोजकम्। प्रबलप्रमाणसत्वे उद्देश्यसमर्पकं वा अपूर्वसाधनत्वलक्षणातात्पर्यग्राहकं वा यत् दुर्बलप्रमाणं भवति तदपि विनियोजकमिति वदामः चेत् प्रबलप्रमाणापेक्षया अधिकतया पूर्वपूर्वप्रमाणकल्पनारूपगौरवापत्तिः। अतः प्रबलप्रमाणमेव विनियोजकमिति स्वीक्रियते। एवञ्च विनियोजकप्रमाणानि तथा तात्पर्यग्राहकप्रमणानि इति प्रमाणद्वयं भवति इति जातम्। यथा विनियोजकप्रमाणानां बलाबलविचारः तथा तात्पर्यग्राहकप्रमाणानामपि बलाबलविचारः क्रियते।

[9] तै.सं. ६.१.६

[10] तै.सं. ५.५.७

Vāk-Madhyamā, a Biannual Peer-Reviewed e-Journal of Research
ISSN 3139-9622

Issue : 001 Vol. 1 theaikyafoundation.org.in February, 2026

श्रुतेः बलाबलविचारः

आदौ श्रुत्योर्विरोधे उदाहरणं प्रदर्श्यते- तद्धितश्रुतिः, तथा विभक्तिश्रुतिः अनयोर्मध्ये तद्धितश्रुतिः प्रबला। **ऐन्द्र्या गार्हपत्यमुपतिष्ठते** इत्यत्र ऐन्द्री इत्यत्र **सा अस्य देवता** [11]इति स्मृत्या तद्धितप्रत्ययः **सूक्तहविषोः** इति च स्मृतिबलात् सूक्तरूपार्थे विहितः। अतः इन्द्रः देवता अस्य सूक्तस्य इति ऐन्द्री इति व्युत्पत्या ऐन्द्रीमन्त्रस्य इन्द्रदेवताप्रकाशनार्थत्वमवगतम्। ऐन्द्र्या इति तृतीयाश्रुत्या गार्हपत्याङ्गत्वमवगम्यते। पूर्वोक्तरीत्या अत्र सूक्ततद्धितः वर्तते। तर्हि केवलम् इयं सूक्ततद्धितश्रुतिः देवताप्रकाश्यत्वरूपमर्थं बोधयति, न तु कृतिकारकत्वरूपमर्थम्। ऐन्द्र्या इति तृतीयया श्रुत्या तावत् करणत्वरूपं कृतिकारकत्वं बोध्यते इत्यतः तृतीयाश्रुतिः सूक्ततद्धितश्रुत्यपेक्षया प्रबला भवति इति।

[11] पाणिनीयं सूत्रम् ४.२.२४

Vāk-Madhyamā, a Biannual Peer-Reviewed e-Journal of Research
ISSN 3139-9622

Issue : 001 Vol. 1 theaikyafoundation.org.in February, 2026

श्रुतिलिङ्गयोः बलाबलविचारः -

अङ्गताबोधकप्रमाणेषु श्रुतिः प्रथमं प्रमाणम्। इतराङ्गताबोधकप्रमाणापक्षया अत्यन्तं प्रबला भवति। अन्यानि प्रमाणानि पूर्वपूर्वप्रमाणं कल्पयित्वैव अङ्गत्वं बोधयेयुः, अतः तेषां श्रुत्यपेक्षया दौर्बल्यम्। तदुक्तं जैमिनिना – **श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यम् अर्थविप्रकर्षात्** [12]इति। अतः द्वितीयं प्रमाणं लिङ्गं श्रुत्यपेक्षया दुर्बलम्। ऐन्द्री-ऋचः अर्थप्रकाशनसामर्थ्यरूपलिङ्गात् इन्द्रोपस्थानार्थत्वं वक्तव्यम्। एवं सामर्थ्यसत्वात् इन्द्रप्रकाशकमन्त्रेण इन्द्रोपस्थानं भावयेत् इति श्रुतिः कल्पनीया। तत्पश्चात् ऐन्द्री-ऋचः इन्द्रोपस्थानार्थत्वं वक्तुं शक्येत। परन्तु ऐन्द्र्या गार्हपत्यमुपतिष्ठते इति प्रत्याक्षा श्रुतिरस्ति। प्रत्यक्षश्रुतिः कल्प्यां श्रुतिं बाधते। तस्मात् प्रत्यक्षश्रुत्यनुसारं ऐन्द्री मन्त्रस्य विनियोगः गार्हपत्योपस्थाने भवति, नतु लिङ्गानुसारं इन्द्रोपस्थाने विनियोगः।

अत्र शङ्का- समग्राङ्गोपदेशः यत्र न भवति सा विकृतिः[13]। अतः विकृतौ अङ्गानाम् आकाङ्क्षा भवति। तस्याः आकाङ्क्षायाः उपशमनार्थं प्राकृताङ्गानाम् अतिदेशः क्रियते। प्राकृताङ्गानि प्रकृतौ कृतार्थानि, शान्ताकाङ्क्षानि। तथापि तत्र विकृत्याकाङ्क्षाम् उपशमयितुं प्राकृताङ्गेषु आकाङ्क्षामुत्थाप्य अतिदेशः कल्प्यते। एवमत्रापि भवतु। तथा हि- इन्द्रदेवतां प्रकाशयितुम् ऐन्द्रीमन्त्रः आसीत्। परन्तु प्रत्यक्षश्रुतिसत्वात् ऐन्द्रीमन्त्रेण गार्हपत्योपस्थानं कर्तव्यमिति गार्हपत्योपस्थाने ऐन्द्रीमन्त्रोऽयं विनियुज्यते। तावता तस्य मन्त्रस्य आकाङ्क्षा शान्ता। अतः लिङ्गं श्रुतिं न कल्पयति, अतः लिङ्गं श्रुतिः बाधते इत्युक्तम्। अतिदेशं कल्पयितुं यथा शान्ताकाङ्क्षस्यापि प्राकृताङ्गस्य अकाङ्क्षा उत्थाप्यते, तथैव अत्रापि ऐन्द्रीमन्त्रस्य आकाङ्क्षामुत्थाप्य, लिङ्गं श्रुतिं कल्पयतीति किमर्थं न स्वीक्रियते इति।

तत्र समाधानम्- अतिदेशस्थले विकृतिः न शन्ताकाङ्क्षा भवति, नियमेन प्राकृताङ्गानि काङ्क्षति इति स्थितिः वर्तते। परन्तु प्रकृते इन्द्रदेवता नियमेन ऐन्द्रीमन्त्रं काङ्क्षते इति नास्ति, ध्यानाद्युपायान्तरेणापि इन्द्रदेवताप्रकाशनसंभवात्। अतः दृष्टान्तदार्ष्टान्तिकयोः वैषम्यं वर्तते। अतः श्रुतिः लिङ्गं बाधते एव।

[12] जै.सू ३.३.१४
[13] अर्थसङ्ग्रहः Page No 88

पुनः शङ्का – अत्र श्रुतिलिङ्गयोः विरोधः नास्ति। ऐन्द्रीमन्त्रस्य अङ्गत्वं श्रुत्यापि बोध्यते, लिङ्गेनापि। ऐन्द्रीमन्त्रः गार्ह्यपत्योपस्थानं प्रति अङ्गम् इति तु केवल्श्रुत्या न बोध्यते। अपितु वाक्यसहकृतश्रुत्या बोध्यते। साध्यत्वांशः वाक्येन समर्प्यते, विधेयत्वांशः श्रुत्या समर्प्यते। साध्यत्वांशे अवगते सत्येव विरोधः। केवलविधेयांशे तु विरोधः नास्ति। श्रुतिः ऐन्द्रीमन्त्रस्य करणत्वं बोधयति। तत्करणत्वं गार्हपत्योपस्थाननिरूपितमिति तु वाक्येन बोध्यते। अतः केवलयोः श्रुतिलिङ्गयोः विरोधः एव प्रकृते नास्ति। विरोधः तु वाक्यलिङ्गयोर्मध्ये अतः वाक्यलिङ्गयोर्विरोधे एव इदमुदाहरणं स्यात् खलु इति।

तत्रोच्यते- तुष्यतु दुर्जनः इति न्यायेन वाक्यलिङ्गयोः इदमुदाहरणमिति स्वीक्रियते चेदपि अत्र वाक्यमेव लिङ्गापेक्षया प्रबलं भवति। **आनर्थक्यप्रतिहतानां विपरीतं बलाबलमिति** न्यायेन[14] वाक्यमत्र प्रबलमिति स्वकर्तव्यम्। **त्वं ह्यग्ने प्रथमा मनोता**[15] इति मनोतामन्त्रः। अयं मन्त्रः अग्नीषोमीयपशुयागप्रकरणे पठितः वर्तते। तत्र तु देवता अग्नीषोमौ। अतः लिङ्गानुसारेण अस्य मन्त्रस्य प्रकरणादुत्कर्षः कर्तव्यः आसीत्। परन्तु **यद्यप्यन्यदेवत्यः पशुः आग्नेयी एव मनोता कार्या** इति ब्राह्मणवाक्यं वर्तते। अतः अस्य वाक्यस्य आनर्थक्यपरिहाराय यद्यपि वाक्यं लिङ्गापेक्षया प्रबलम्, परन्त्वत्र वाक्यं प्रबलमिति स्वीक्रियते। एवं यथा तत्र तथा अत्रापि ऐन्द्र्या गार्हपत्यमुपतिष्ठते इति वाक्यस्य आनर्थक्यपरिहाराय वाक्यमेव लिङ्गं बाधते।

[14] मीमांसाकोशः द्वितीयः भागः page no 944
[15] तै.ब्राह्मणम् ३.६.१०.१

वस्तुतस्तु इदं वाक्यलिङ्गयोः विरोधे उदाहरणं न भवितुमर्हति। श्रुतिः यथा केवलं ऐन्द्रीमन्त्रस्य करणत्वं समर्पयति, तथैव वाक्यमपि गार्हपत्योपस्थानस्य साध्यत्वमात्रं उपस्थापयति। श्रुतिसहकृतं वाक्यम्, अथवा वाक्यसहकृता श्रुतिरेव ऐन्द्रीमन्त्रस्य गार्हपत्योपस्थानत्वं बोधयितुं समर्था भवति, न केवलम् एकं प्रमाणम्। अथवा ऐन्द्र्या इत्यत्र तृतीयाश्रुतिमात्रं त्यज्यते चेत् ऐन्द्री गार्हपत्यमुपतिष्ठते इति वाक्यं भवति। अस्यार्थः इन्द्रप्रकाशकमर्थमुच्चारयन् गार्हपत्यसमीपे तिष्ठतीति। तथा च लिङ्गेन यः इन्द्रप्रकाशनरूपः अर्थः बोध्यते सः न बाधितः। एवंञ्च केवला श्रुतिः वा वाक्यं वा ऐन्द्रीमन्त्रस्य गार्हपत्याङ्गत्वं न बोधयतीत्यतः श्रुतिवाक्याभ्यां सह लिङ्गस्य विरोधः वर्तते। परन्तु **प्राधान्येन व्यपदेशाः भवन्ति** इति न्यायेन श्रुतेः प्रबलप्रमाणत्वात् प्राधान्यं स्वीकृत्य श्रुतिलिङ्गयोः विरोधे इदमुदाहरणमिति उच्यते। एवमेव अग्रिमप्रमाणेषु बलाबलविचारः अपि वर्तते।

एवञ्च अस्मिन् लेखे बलाबलविचारस्य प्रसक्तेः सन्दर्भाः, विनियोजकप्रमाणयोः यथा बलाबलविचारः तथैव अपूर्वतात्पर्यग्राहकप्रमाणानामपि बलाबलविचारस्य आवश्यकता, अनेकेषु प्रमाणेषु सत्सु विनियिजकप्रमाणनिर्णयः, एवं कयोः प्रमाणयोर्मध्ये बलाबलविचारः क्रियते इति निर्णयार्थं नियामकम् इत्येवं बलाबलविचारार्थं औपयिकाः आरम्भिकाः विषयाः अत्र निरूपिताः वर्तन्ते।

परिशीलितग्रन्थसूची :-

1. सायणमाधवाचार्याः, “जैमिनीयन्यायमाला”, – Published by Anand Sharma press , Poona , 1892.
2. खण्डदेवः, “भाट्टदीपिका”, प्रथमं संपुटम् , Published by राष्ट्रियसंस्कृतसंस्थानम् , नवदेहलि , 2010.
3. आपदेवः , “मीमांसान्यायप्रकाशः” Published by चौखम्भा संस्कृत संस्थान in 2008 .
4. कृष्णयज्वा, “मीमांसापरिभाषा” , Published by Chowkhamba krishnadas academy in 2009.
5. लौगाक्षिभास्करः, “अर्थसङ्ग्रहः” तन्त्रप्रकाशिक इति व्याख्योपेतः Published by डी.टी.स्वामिप्रकाशनम् in 1998.
6. कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणम् , Published by श्रीनृसिंहप्रिया ट्रस्ट् चेन्नै in 2016.

7. कृष्णयजुर्वेदीयतैत्तिरीयसंहिता , Published by श्रीनृसिंहप्रिया ट्रस्ट् चेन्नै in 2016.
8. कुमारिलभट्टपादाः, “श्लोकवार्तिकम्” Published by Ratna publications , Varanasi in 2007.
9. पट्टाभिरामशास्त्री, “मीमांसानयमञ्जरी” Published By Dr. Harish Chandra mani Tripathi, sampornanand Sanskrit University , Varanasi. 1984.
10. श्रीवासुदेवाध्वरी, “अध्वरमीमांसाकुतूहलवृत्तिः – ” published by L.B.S Sanskrit University New Delhi. 1969
11. राघवेन्द्रयतिः, “भाट्टसङ्ग्रहः” Published By Dvaita Vedanta Studies and Research Foundation Bangalore. 2004
12. मीमांसाकोशः - Published By V G Joshi Prajna Pathashala Mandal, Satara 1953